**SA – 471**

# IV Semester B.Com. Examination, April/May 2015
## (2012-13 and Onwards) (Freshers + Repeaters)
## LANGUAGE SANSKRIT – IV
## Bhaimiparinaya Nataka Sangraha (Acts V-IX) and Kamandaka Nitisara

Time : 3 Hours Max. Marks : 100

***Instruction** : Answer in **Sanskrit, Kannada** or **English**.*

I. **द्वयो:** प्रश्नयो: उत्तरं लिखत। **(2×12=24)**

ಎರಡು ಪ್ರಶ್ನೆಗಳಿಗೆ ಉತ್ತರಿಸಿ:

Answer **any two** questions :

1) पुष्करस्य पात्रचित्रणं कुरुत।

ಪುಷ್ಕರನ ಪಾತ್ರ ಚಿತ್ರಣವನ್ನು ಮಾಡಿ.

Sketch the character of Pushkara.

2) दमयन्तीदुर्गसेनयो: प्रसङ्गं अधिकृत्य लिखत।

ದಮಯಂತಿ ದುರ್ಗಸೇನರ ಪ್ರಸಂಗವನ್ನು ಕುರಿತು ಬರೆಯಿರಿ.

Write about the incident of Damayanti and Durgasena.

3) 'बाहुकोद्वेगम्' अधिकृत्य प्रबन्धम् लिखत।

'ಬಾಹುಕೋದ್ವೇಗ'ವನ್ನು ಕುರಿತು ಪ್ರಬಂಧವನ್ನು ಬರೆಯಿರಿ.

Write an essay on 'Bahukodvegam'.

II. **चतुर्णां** श्लोकानाम् अनुवादं कृत्वा भावं विवृणुत। **(4×6=24)**

ಯಾವುದಾದರೂ ನಾಲ್ಕು ಶ್ಲೋಕಗಳನ್ನು ಅನುವಾದಿಸಿ ಭಾವವನ್ನು ವಿವರಿಸಿ.

Translate and explain **any four** of the following stanzas.

1) युद्धेरन्यदुरासदो नल इति ख्यातिस्तथैवैधताम्

अक्षैरेव विजित्य तं सदयितं प्रच्याव्य राज्यात्स्वकात्।

निस्स्वौ तौ विघटय्य भर्तृविरहाद एकाकिनीं तां प्रियां

तैस्तैश्चाटुशतै: प्रलोभ्य वशयन् भोक्ष्यामि मोक्ष्यामि किम् ?॥

2) किमिदम् अभिदधासि क्षत्रियाणी त्वमेवम् ?
विगतविमतभीतिर्वीरवर्य: पिता मे ।
अहह किमु तदानीं व्यस्मरच्छस्त्रशास्त्रं ?
किमुत सपदि बाहू निद्रितौ मुद्रितौ वा ? ।।

3) त्वमेकवासा: अहमेकवासा:
शीता निवासा: कठिना: प्रवासा: ।
लोके प्रहासाय ममेतिहासा:
देहे जिहासाऽद्य शुभाऽऽवहा सा ।।

4) विभवश्च विवेकश्च स्नेहस्सत्यं दया सुखम् ।
सर्वमेतन्मया त्यक्तम् अद्य त्वां त्यजता वने ।।

5) दर्यां झर्यां दुर्गमे दुर्गमध्ये
मार्गे मार्गे मार्गणं मे वृथाऽभूत् ।
कष्टं कष्टं कर्णधारेण शून्या
मध्ये सिन्धोर्नौरिवाऽऽसं विसृष्टा ।।

6) कार्यस्य चिन्ता, करणस्य चिन्ता,
कामस्य चिन्ता, कलहस्य चिन्ता ।
धनस्य चिन्ता, निधनस्य चिन्ता
चिन्ताविहीनो न हि कश्चिदस्ति ।।

III. **कन्नडभाषया आंग्लभाषया** वा अनुवदत । **(1×10=10)**

**ಕನ್ನಡ** ಭಾಷೆಗೆ ಅನುವಾದ ಮಾಡಿ.

Translate into **English**.

कलि : ततस्तदभिनिविष्टमना: तां परिणीय वशयितुं कुण्डिनं नगरमगमम् । तावदेव सा नलेन परिणीतेति स्वयंवरस्थानात्स्वर्गमधिगच्छतो महेन्द्रात् अनुश्रुत्य प्रज्वलित: तदपजिहीर्षया निषधान् अयासिषम् ।

द्वापर: ततस्तत: ?

कलि: अय नलदमयन्त्योर्विघटनोपायं विचिन्तयन् कश्चित्कालम् अपानयम् ।

द्वापर : अत्र किञ्चित्पृच्छामि, शुद्धान्तं प्रविश्य कुतो बलान्नापहृता सा ?

अथवा/ಅಥವಾ/OR

दुर्गसेनः हन्त, ममायमवसरः प्राप्तः (सप्रमोदं शिरश्चलयन् ) सोऽहमिदानीं मृगयाप्रसङ्गेन मुग्धहरिणीग्रहणाय प्रवृत्तेन महाराजपुष्करेण रहसि समाज्ञप्तोऽस्मि स्वजनप्रोत्साहनाय। (विचिन्त्य) तदिदानीम् अहमपि दुर्गमेऽस्मिन्वने समन्विष्यामि तां मुग्धहरिणीम्। साधयंश्च साध्यजातं स्वामिप्रसादस्य पात्रीभूय स्थिरीकरिष्यामि वनराज्याधिपत्यम्। एवञ्च स्वकार्यं स्वामिकार्यञ्च निर्वर्त्येत। अतो ममायमवसरः प्राप्तः। (सप्रमोदं कुहूरुतेन नृत्यति।)

(ततः प्रविशति दमयन्ती).

IV. **त्रीणि** वाक्यानि ससन्दर्भं विवृणुत। **(3×4=12)**

**ಮೂರು** ವಾಕ್ಯಗಳನ್ನು ಸಂದರ್ಭಸಹಿತ ವಿವರಿಸಿ.

Explain with reference to context **any three** sentences :

1) उपायेन हि यच्छक्यं न तच्छक्यं पराक्रमैः।
2) देव ! कर्तव्यमनालोच्य न कर्तव्यं खलु।
3) कान्तागुणास्ते त्वयि सम्प्लवन्ते।
4) भल्लूकहस्तपतितेवाऽस्मि।
5) बलाद् आकृष्यमाणा चेत् सरसा विरसा भवेत्।
6) देवो न जानाति कुतो मनुष्यः।

V. **द्वयोः** लघुटिप्पणी लिखत। **(2×5=10)**

**ಎರಡು** ವಿಷಯಗಳನ್ನು ಕುರಿತು ಲಘು ಟಿಪ್ಪಣಿ ಬರೆಯಿರಿ.

Write short notes on **any two** of the following :

1) द्वापरः।
2) विष्कम्भकः।
3) वामदेवः।
4) भरतवाक्यम्।

VI. कामन्दकीय नीतिसारोक्त राजपरिवारमधिकृत्य प्रबन्धमेकं लिखत। **(1×12=12)**

ಕಾಮಂದಕೀಯ ನೀತಿಸಾರದಲ್ಲಿ ಹೇಳಿರುವ ರಾಜಪರಿವಾರವನ್ನು ಕುರಿತು ಪ್ರಬಂಧ ಬರೆಯಿರಿ.

Write an essay on kings courtiers as told in Kamandakeeya Neetisara.

अथवा/ಅಥವಾ/OR

मनुस्मृतिमधिकृत्य प्रबन्धमेकं लिखत।

ಮನುಸ್ಮೃತಿಯನ್ನು ಕುರಿತು ಪ್ರಬಂಧ ಬರೆಯಿರಿ.

Write an essay on Manu Smriti.

VII. द्वयोः लघुटिप्पणी लिखत। **(2×4=8)**

ಯಾವುದಾದರೂ **ಎರಡು** ವಿಷಯಗಳಿಗೆ ಲಘು ಟಿಪ್ಪಣಿ ಬರೆಯಿರಿ.

Write short notes on **any two** of the following :

1) नारदस्मृतिः।

2) कामन्दकीय नीतिसारः।

3) पराशर स्मृतिः।

4) सप्ताङ्गं राज्यमुच्यते।

---